साहित्यम्　　　उपशास्त्री　I　　　　03-12-2020

व्याख्या　"किरातार्जुनीयम्"

"तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥"

श्लोकोऽयं महाकवि भारविणा विरचितस्य किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति । वनवासकाले द्वैतवने न्यवसन् युधिष्ठिरः दुर्योधनस्य व्यवहारं प्रजां प्रति ज्ञातुं यम् गुप्तचरं प्रेषितवान् सः वर्णिलिङ्गी सर्वं ज्ञात्वा युधिष्ठिरम् अकथयत् – यद्यपि स दुर्योधनः सिंहासनारूढः अस्ति तथापि वने प्रवसतो भवतः पराजयं विशङ्कते अतएव या पृथ्वी तेन द्यूतव्याजेन अर्जिता ताम् अधुना नयेन वशीकर्तुं चेष्टते । स कुटिलः सामदामदण्डादि-भेदेन भवन्तं जेतुम् ईहमानः स्वकीयं यशः विस्तारयति । दुर्जनसंसर्गापेक्षया सज्जनैः सह स विरोधोऽपि वरम् एव येन ऐश्वर्यम् उत्कर्षं गच्छति ।

व्याकरणम् → जिह्मः – ह्वा + मन् (वक्रः, कुटिलः),
भवज्जिगीषया – भवन्तं जेतुम् इच्छा तया । शुभ्रम् – √शुभ् + रक् उज्ज्वलम् । समुन्नयन् – सम् + √उत् + शतृ ।

छन्दः → वंशस्थवृत्तम् ( जतौ तु वंशस्थमुदीरितं जरौ ) ।

अलङ्कारः → अर्थान्तरन्यासः । तल्लक्षणं तु –

"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥"

[signature] 03-12-2020

डॉ० निर्मलकुमार झा, ( सं० प्राचार्य )
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।
का० सिं० द० सं० विश्ववि० दरभङ्गा ।

संस्कृत सामान्यम् । उपशास्त्री - II 03-12-2020

अनिवार्यपत्रम् सन्धिः, सन्धिविच्छेदः, रूपसिद्धिः कार्याणि ।

1. हर इह (हरयिह) → हरे + इह

'एचोऽयवायावः' सूत्रेण हरे इत्यस्य 'ए' स्थाने 'अय्' आदेशः

(हरय् इह) हर् अय् इह । अस्मिन् अवस्थायां 'अश्' प्रत्याहारस्य इकारे परे भूत्वा 'लोपः शाकल्यस्य' सूत्रेण विकल्पतः पदान्त यकारस्य लोपः → हर इह रूपम् भवति ।

हर इहे आद्गुणः सूत्रेण गुणादेशः किन्तु 'पूर्वत्राऽसिद्धम्' परिभाषया 'लोपः शाकल्यस्य' असिद्धत्वं भूत्वा गुणकार्यं नैव भवति । अतः यकारस्य व्यवधाने हर इह रूपम् । अभाव पक्षे → हर् अय् इह = हरयिह रूपम् ।

2. हरये → हरे + ए, 'एचोऽयवायावः' सूत्रेण ए स्थाने अय् ।

हर् अय् ए = हरये ।

एवं प्रकारेण नै + अकः = नायकः । विष्णवे - विष्णो + ए । शयनम्, गायनम्, पवनः, पावकः, गायकः, विनायकः, नयनम्, नाविकः, भावुकः, भवनम् इत्यादयः अयादिस्वर-सन्धेः उदाहरणानि सन्ति ।

3. पररूप सन्धिः → शकन्धुः → शक + अन्धुः, 'अकः सवर्णे दीर्घः' सूत्रस्य बाधः, अचोऽन्त्यादि टि, 'शकन्ध्वादिषु पररूपं वाच्यम्' वार्तिकत्वात् प्रथम पद 'शक' इत्यस्य 'टि' (अ) भागस्य पररूपम् → शक् अन्धुः = शकन्धुः ।

एवं प्रकारेण कर्कन्धुः, कुलटा (कुल + अटा), सीमन्तः (सीम + अन्तः), मनीषा (मनस् + ईषा), हलीषा (हल + ईषा), पतञ्जलिः (पत + अञ्जलिः) अथवा (पतत् + अञ्जलिः), सारङ्गः (सार + अङ्गः), साराङ्गः अपि रूपम् भवति, यत्र पशवादयः अभिप्रेतः न भवति तत्र ।

03-12-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महा वि० सुखसेना, पूर्णियाँ

03-12-2020

शास्त्री

साहित्यम् ।

छन्दविचारः ।

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः

शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः ।

यक्षश्चक्रे जनकतनया-स्नानपुण्योदकेषु

स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

कालिदास / पूर्वमेघ (मेघदूतम्) - 1

पद्यस्य प्रत्येके चरणे सप्तदशाक्षराः सन्ति ।

श्लोके यगणादिनिर्णयः →

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः ,

S S S S I I I I I S S I S S I S S

मगण भगण नगण तगण तगण गुरु गुरु

शापेनास्तं गमितमहिमा वर्षभोग्येण भर्तुः ।

S S S S I I I I I S S I S S I S S

मगण भगण नगण तगण तगण गुरु गुरु

अस्मिन् पद्ये प्रत्येके चरणे मगणभगणौ, नगणतगणौ पुनश्च तगणपश्चाद् गुरुद्वयमस्ति ।

अतएव अस्मिन् पद्ये अत्यष्टिजात्याः मन्दाक्रान्ता छन्दः अस्ति ।

तल्लक्षणम् → " मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरुचेत् ।

मन्दाक्रान्ते छन्दे चतुर्भिः षड्भिः सप्तभिश्च यतिः भवति ।

03-12-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।